# શિવાનન્દલહરી સ્તોત્રમ

## Shivanandalahari Stotram

---

શિવાનન્દલહરીસ્તોત્રમ |

પુરે પૌરાન્પશ્યન્નરયુવતિનામાકૃતિમયાન સુવેશાન સ્વર્ણાલઙ્કરણકલિતાશ્ચિત્રસદૃશાન |
સ્વયં સાક્ષી દ્રષ્ટેત્યપિ ચ કલયંસ્તૈઃ સહ રમન મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧||

વને વૃક્ષાન્પશ્યન દલફલભરાન્નમ્રમુશિખાન્ઘનચ્છાયાછન્નાન બહુલકલકૂજદ્વિજગણાન |
ભક્ષન ઘસ્રે રાત્રાવવનિતલતલ્પૈકશયનો મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૨||

કદાચિત્પ્રાસાદે ક્વચિદપિ તુ સૌધે ચ ધવળે કદાકાલે શૈલે ક્વચિદપિ ચ કૂલે ચ સરિતામ |
કુટીરે દાન્તાનાં મુનિજનવરાણામપિ વસન મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૩||

ક્વચિદ્બાલૈઃ સાર્ધં કરતલજતાલૈશ્ચ હસિતૈઃ ક્વચિદ્વૈ તારુણ્યાઙ્કિતચતુરનાર્યા સહ રમન |
ક્વચિદ્વૃદ્ધૈશ્ચિન્તાં ક્વચિદપિ તદન્યૈશ્ચ વિલપન મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૪||

કદાચિદ્વિદ્વદ્ભિર્વિવિધસુપુરાનન્દરસિકૈઃ કદાચિત્કાવ્યાલઙ્કૃતરસરસાલૈઃ કવિવરૈઃ |
વદન્વાદાંસ્તર્કૈરનુમિતિપરૈસ્તાર્કિકવરૈર્મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા || ૫||

કદા ધ્યાનાભ્યાસૈઃ ક્વચિદપિ સપર્યા વિકસિતૈઃ સુગન્ધૈ સત્પુષ્પૈઃ ક્વચિદપિ દલૈરેવ વિમલૈઃ |
પ્રકુર્વન્દેવસ્ય પ્રમુદિતમનાઃ સંસ્તુતિપરો મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૬||

શિવાયાઃ શંભોર્વા ક્વચિદપિ ચ વિષ્ણોરપિ કદા ગણાધ્યક્ષસ્યાપિ પ્રકટતપનસ્યાપિ ચ કદા |
પઠન્વૈ નામાલિં નયનરચિતાનન્દસલિલો મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૭||

કદા ગઙ્ગાંભોભિઃ ક્વચિદપિ ચ કૂપોત્થિતજલૈઃ ક્વચિત્કાસારોત્થૈઃ ક્વચિદપિ સદુષ્ણૈશ્ચ શિશિરૈઃ |
ભજન્સ્નાનૈર્ભૂત્યા ક્વચિદપિ ચ કર્પૂરનિભયા મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૮||

કદાચિજ્જાગૃત્યાં વિષયકરણૈઃ સંવ્યવહરન કદાચિત્સ્વનસ્થાનપિ ચ વિષયાનેવ ચ ભજન |
કદાચિત્સૌષુપ્તં સુખમનુભવન્નેવ સતતં મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૯||

કદાપ્યાશાવાસાઃ ક્વચિદપિ ચ દિવ્યામ્બરધરઃ ક્વચિત્પઞ્ચાસ્યોત્થાં ત્વચમપિ દધાનઃ કટિતટે |
મનસ્વી નિઃશઙ્કઃ સ્વજનહૃદયાનન્દજનકો મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧૦||

કદાચિત્સત્ત્વસ્થઃ ક્વચિદપિ રજોવૃત્તિયુગતસ્તમોવૃત્તિઃ ક્વાપિ ત્રિતયરહિતઃ ક્વાપિ ચ પુનઃ |
કદાચિત્સંસારી શ્રુતિપથવિહારી ક્વચિદપિ મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧૧||

કદાચિન્મૌનસ્થઃ ક્વચિદપિ ચ વ્યાખ્યાનનિરતઃ કદાચિત્સાનન્દં હસતિ રમસત્યક્તવચસા |

કદાચિલ્લોકાનાં વ્યવહતિસમાલોકનપરો મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧૨||

કદાચિચ્છક્તીનાં વિકચમુખપદ્મેષુ કવલાન્ક્ષિપંસ્તાસાં ક્વાપિ સ્વયમપિ ચ ગૃહ્ણન્સ્વમુખતઃ |
મહાદ્વૈતં રૂપં નિજપરવિહીનં પ્રકટયન મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧૩||

ક્વચિચ્છૈવૈઃ સાર્ધં ક્વચિદપિ ચ શાક્તૈઃ સહ વસન કદા વિષ્ણોર્ભક્તૈઃ ક્વચિદપિ ચ સૌરૈઃ સહ વસન |
કદાગાણાપત્યૈર્ગત સકલભેદોઽદ્વયતયા મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧૪||

નિરાકારમ ક્વાપિ ક્વચિદપિ ચ સાકારમમલમ નિજં શૈવં રૂપં વિવિધગુણભેદેન બહુધા |
કદાશ્ચર્યં પશ્યન્કિમિદમિતિ હૃષ્યન્નપિ કદા મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧૫||

કદા દ્વૈતં પશ્યન્નખિલમપિ સત્યં શિવમયં મહાવાક્યાર્થાનામવગતસમભ્યાસવશતઃ |
ગતદ્વૈતાભાવઃ શિવ શિવ શિવેત્યેવ વિલપન મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમા ||૧૬||

ઇમાં મુક્તાવસ્થાં પરમશિવસંસ્થાં ગુરુકૃપાસુધાપાઙ્ગાવાપ્યાં સહજસુખવાપ્યામનુદિનમ |
મુહુર્મજ્જન્મજ્જન ભજતિ સુકૃતી ચેન્નરવરસ્તદા યોગી ત્યાગી કવિરિતિ વદન્તીહ કવયઃ ||૧૭||

મૌને મૌની ગુણિનિ ગુણવાન પણ્ડિતે પણ્ડિતશ્ચ દીને દીનઃ સુખિનિ સુખવાન ભોગિનિ પ્રાપ્તભોગઃ |
મૂર્ખે મૂર્ખો યુવતિષુ યુવા વાગ્મિનિ પ્રૌઢવાગ્મી ધન્યઃ કોઽપિ ત્રિભુવનજયી યોઽવધૂતેઽવધૂતઃ ||૧૮||

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતાં શ્રીશિવાનન્દલહરીસ્તોત્રં સંપૂર્ણં||

**www.shaivam.org**